# ॥ श्रीश्यामदेवाष्टोत्तरशतनामस्तोत्रम् ॥

.. shrIshyAmadevAShTottarashatanAmastotram ..

sanskritdocuments.org

June 30, 2017

# .. shrIshyAmadevAShTottarashatanAmastotram ..

# ॥ श्रीश्यामदेवाष्टोत्तरशतनामस्तोत्रम् ॥

## Sanskrit Document Information

Text title : shyAmadevAShTottarashatanAmastotram

File name : shyAmadevAShTottarashatanAmastotram.itx

Category : aShTottarashatanAma

Location : doc_vishhnu

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : anonymous456an at gmail.com

Proofread by : anonymous456an at gmail.com

Description-comments : shyAmadevopAsana Puja book by Shri Kishor Mishra

Latest update : June 30, 2017

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

June 30, 2017

*sanskritdocuments.org*

# ॥ श्रीश्यामदेवाष्टोत्तरशतनामस्तोत्रम् ॥

अनाद्यन्तो ह्यनन्तश्रीराकाशग इहागमः ।
ईतित्राता चोग्रदण्ड ऊतिकृदृणशोधनः ॥ १॥

एकराडैतिहासिक्यमृग्य ओषधिवीर्यदः ।
औपनिषदोंऽशुमान् केशप्रियः कल्याणवृत्तिदः ॥ २॥

कलिकालेऽद्भुताचिन्त्यशक्तिशाली कृतिप्रियः ।
खाटूग्रामकृतस्थानः खाटूयात्राजनप्रियः ॥ ३॥

गुणाढ्यो गुणिसंरक्षी ग्रहभीतिविनाशकः ।
घटनाप्रियश्चन्द्ररम्यः छत्रधारी जयप्रदः ॥ ४॥

झटित्याश्चर्यकारी च टुप्क्रोधी ठाकुरप्रभुः ।
डाकिनीत्रासनिर्हारी ढुण्ढारिक्षेत्रमध्यगः ॥ ५॥

णकारैवदुर्लक्ष्यपदस्तेजस्तपोनिधिः ।
तपनीयाभूषणाढ्यो थूत्कारापहतासुरः ॥ ६॥

दृढव्रतो दृढप्रेमी दाता दानविधिप्रियः ।
धीरो धीरप्रियो धीमान् धीदाता धान्यवर्धनः ॥ ७॥

धात्रीप्रियो धैर्यदाता न्यायकारो नतिप्रियः ।
पामराणामपि त्राता पापहारी पशुप्रदः ॥ ८॥

फाल्गुनेऽफल्गुदाता च बहुबाहुर्भयापहः ।
भक्तप्रियो भक्तसखो भक्तभावप्रपोषकः ॥ ९॥

भक्तिदो भक्तवचसां श्रोता च भजनप्रियः ।
मितभाषी मृषाद्वेषी यज्ञप्रेमी यमप्रियः ॥ १०॥

रम्यमन्दिरमध्यस्थो लीलया बहुरूपधृक् ।
विशालभालतिलकः शरणागतवत्सलः ॥ ११॥

षट्कर्मविद्यः सन्तानदाता तु हवनप्रियः ।
श्रीश्यामदेवो ब्रह्मण्यो बालकेशार्पणप्रियः ॥ १२॥

दाम्पत्यक्षेमकर्ता च शुभोष्णीषी सदर्थकृत् ।

उशीरवासितजलप्रियः केतकिगन्धभूत् ॥ १३॥

कौसुम्भवर्णवस्त्राढ्यः केसरालेपनप्रियः ।
अआयताक्षः सुदीप्ताक्षः सुनासा विततश्रवाः ॥ १४॥

श्रृङ्गारहृद्यो लोकेशो वर्वराकारकेशवान् ।
दर्शनीयतमः श्यामः सुललाटः सुविक्रमः ॥ १५॥

किरीटी मणिरत्नाढ्यो मकराकृतिकुण्डली ।
श्वेतध्वजः स्मितमुखो भक्तानामभयङ्करः ॥ १६॥

भक्तानां पालनार्थाय नानावेषधरोऽनघः ।
सत्यप्रियः प्राणदाता सत्यसख्यः सदावसुः ॥ १७॥

द्वादशीतिथिसंसेव्यः साज्यचूर्णोलिमप्रियः ।
श्रीमद्भागवतास्वादरसिको भूतिवर्धनः ॥ १८॥

॥ फलश्रुतिः ॥

अष्टोत्तरशतं नाम्ना प्रभोः श्यामस्य सेव्यताम् ।
क्षेमः शिवं रोगदोषनिवृत्तिरनुभूयताम् ॥ १९॥

श्रीश्यामकृपया ह्येतन्नाम्नामष्टोत्तरं शतम् ।
गोपालचन्द्रमिश्रस्तु लोके प्राचीकशच्छुभम् ॥ २०॥

॥ इति श्रीश्यामदेवाष्टोत्तरशतनामस्तोत्रम् ॥

Encoded and proofread by anonymous456an at gmail.com

.. shrIshyAmadevAShTottarashatanAmastotram ..
was typeset using XƎLATEX 0.99996
on June 30, 2017

Please send corrections to *sanskrit@cheerful.com*